तम् । बधात् शङ्कर! वै येन तस्माद्रच्चन्न घातयेत् । पशुहिंसाविधिर्यत्र पुराणे निगमे तथा । उक्तो रजस्तमोभ्यां स केवलं मनसापि वा । नरकस्वर्गसेवार्थं संसाराय प्रवर्त्तितः । तयोस्तत्कर्मभोगेन गमनागमनं भवेत् । सत्वेन सात्त्वतग्रन्थे स विधिर्नैव शङ्कर ! । प्रवृत्तितो निवृत्तिस्तु यत्रापि सात्त्विकी क्रिया । एवं नानाविधं कर्म पशोरालभनादिकम् । कामाशयः फलाकाङ्क्षी कृत्वाऽज्ञानेन मानवः । पश्चाज्ज्ञानासिना छित्वा भ्रान्त्याशां तामसीं सदा । यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत् ।" पाद्मोत्तरखण्डे १०४ १०५ अ० ।

**बलिध्वंसिन्** पु० बलिं ध्वंसयति स्वस्थानात् पातयति ध्वन्स-णिच्-णिनि । विष्णौ वामनावतारेण हि तस्य तथात्वम् । तत्कथा च वामनपु० २२अ० दृश्या ।

**बलिनन्दन** पु० ६त० बाणासुरे शब्दर० । [चर्मवति अमरः ।

**बलिन(भ)** त्रि० बलि+अस्त्यर्थे-इन भ वा । जरया शिथिल-

**बलिन्** त्रि० बलमस्त्यस्य इनि । १बलवति । २उष्ट्रे, ३महिषे, ४वृषे, ५स्मूकरे, ६कुन्दवृक्षे, ७कफे पु० जटा० ८माषे पु० हेम० । ९बलरामे शब्दर० (वेलियाड़ा) १०क्षुपे स्त्री ङीप् शब्दच० ।

**बलिपुष्ट** पु० बलिना वैश्वदेवबलिद्रव्येण पुष्टः पुष-क्त ३त० । काके अमरः स्त्रियां ङीप् ।

**बलिपोदकी** स्त्री उपोदक्यां राजनि० ।

**बलिप्रिय** पु० बलिनं प्रीणाति प्री-क । लोध्रद्रुमे शब्दच० ।

**बलिविन्ध्य** पु० रैवतकमनोःपुत्रभेदे भाग०८।५।२ ।

**बलिभुज्** पु० बलिं वैश्वदेवद्रव्यम् गृहस्थदत्तबलिं भुङ्क्ते भुज-क्विप् । काके अमरः ।

**बलि(ली)मुख** पु० बलि(ली)युक्तं मुखमस्य शाक०त० । वानरे अमरः । [वति । २उष्ट्रे पु० राजनि० ।

**बलिष्ठ** त्रि० अतिशयेन बली बलिन्+इष्ठन् । १अत्यन्तबल

**बलिष्णु** त्रि०बल-संवरणे इष्णु । अपमानिते उणा० ।

**बलिसद्मन्** न०६त०। पाताले अमरः बलिमन्दिरादयोऽप्यत्र ।

**बलीक** पु० न० वालयति आवृणोति बल-ईकन् नि० । पटल प्रान्ते (काँच) अमरः । [युते स्त्रियां ङीप् ।

**बलीयस्** त्रि० अतिशयेन बली बलिन्+ईयसु । अत्यन्तबल-

**बलीवर्द्द** पु० ई लक्ष्मीः व-विच् वर् तौ ईवरौ ददाति दा-क ईवर्द्दः बली चासौ ईवर्द्दश्चेति । वृषे अमरः । ततः शुभ्रा० अपत्ये ढक् । बालीवर्द्देय तदपत्ये पुंस्त्री०

**बलूल** त्रि० बल+सिध्मा० वा लच् ऊङ् । बलयुक्ते ।

**बलोत्कटा** स्त्री १स्कन्दानुचरमातृकाभेदे भा० श०४५ अ० । २बलेनोत्कटे त्रि० ।

**बल्य** न० बलाय हितं बल+यत् १प्रधानधातौ शुक्रे, २बलसाधने च ३अश्वगन्धायाम्, ४अतिबलायां, ५शिशुड़ीक्षुपे ६प्रसारिण्याञ्च स्त्री राजनि० । बला० चतुरर्थ्यां यत् । ७बलनिर्वृत्ते त्रि० ८बुद्धभिक्षुके पु० त्रिका० । [तृणभेदे हेमच०

**बल्वजा** स्त्री० बल-क्विप् तं वजति वज-गतौ अच् । उलपे

**बल्ह** स्तृतौ दाने, वधे, च सक० याचने द्विक० भ्वा०आत्म० सेट् । बल्हते अबल्हिष्ट बबल्हे ।

**बल्हि** पु०बल्ह-इन् ।१क्षत्रियभेदे२जनपदभेदे स्वार्थे क तत्रार्थे । ततः कोपधत्वात् भवे अण् । बाल्हिक हिङ्गुनि न० ।

**बव** पु०प्रथमे तिथ्यर्द्धरूपे करणभेदे करणशब्दे दृश्यम् ।

**बष्क(स्क)यि(णी)नी** स्त्री मस्क गतौ अयन् पृषो० मस्य बः सस्य वा षत्वम् । बष्क(स्क)योऽस्यास्ति इनि ङीप षमध्यत्वे णत्वम् । चिरप्रसूतायां गवि अमरः । बष्क(स्क)यं नयतीति नी-ड गौ० ङीष् षमध्यत्वे पूर्व० णत्वम् । वष्क(स्क)यणी(नी) इत्यप्यत्र स्त्री ।

**ब(व)ह** वृद्धौ भ्वा० आत्म० अक० सेट् इदित् । बं(वं)हते अबं(वं)हिष्ट । बबंहे महिसाहयोदयमोष्ठ्यादिरिति पाणिनीयाः । दन्तोष्ठ्यादिरिति वोपदेवः ।

**बहल** त्रि०बहि-कलच् नलोपश्च १प्रचुरे २बहुशब्दार्थे च ।

**ब(व)हु** त्रि० बं(व)हि-कु नलोपः । १त्रिप्रभृत्यनेकसङ्ख्यान्विते, २विपुले च । ब(व)ह्वादि० स्त्रियां वा ङीप् ।

बहुत्वं च त्रित्वपर्य्यवसायि कपिञ्जलन्यायात् अपेक्षाबुद्धिविशेषजन्यत्वं तच्च पर्य्याप्त्या सर्वत्र वर्त्तते समवायेन प्रत्येकं वृत्तिमत् । अस्य संख्यावत् कार्य्यम् तेन बहुशः बहुत्र बहुतिथ इत्यादि । [४दात्यूहे खगे ५जलखातके च मेदि०

**बहुक** पु० बहु+संज्ञायां कन् । १कर्कटे २सूर्य्ये ३अर्कवृक्षे

**ब(व)हुकण्टक** पु० ब(व)हूनि कण्टकान्यस्य । १क्षुद्रगोक्षुरे । २यवासे (मोखुरी) ३हिन्ताले ४अग्निदमन्यां स्त्री क्षुपभेदे राजनि० । [कण्टकारिकायाम् राजनि० ।

**ब(व)हुकण्टा** स्त्री ब(व)हवः कण्टाः कण्टकाः यस्याः ।

**ब(व)हुकन्द** पु० ६ब० । १सूरणे । २कर्कट्यां स्त्री० राजनि० ।

**बहुकर** त्रि०ब(व)हूनि किरति कॄ-अच् ।(फराश) १सभासार्जनकरे खलपौ अमरः । करणे अप् । २सम्मार्जन्यां स्त्री हेम० गौरा० ङीष् । कृ-अच् ६त० । ३उष्ट्रे त्रिका० । ४अनेककार्य्यकरे त्रि० । [कर्य्याम् राजनि० ।

**ब(व)हुकर्णिका** स्त्री०ब(व)हवः कर्णा इव पर्णान्यस्य । आखु